"जीवन्ती त्रिमौ गुणौ" भाषापरिच्छेदकारिका ।

**जीवशाक** पु० कर्म्म०। मालवदेशप्रसिद्धे शाकभेदे। "जीवशाकः सुमधुरः ईषदुष्णो वस्तिशोधकः। दीपनः पाचनो बल्यो हृद्यः पित्तापहारकः" राजनि०।

**जीवशुक्ला** स्त्री जीवतीति जीवा जीवन्त्येव शुक्ला क्षीरकाकोल्याम् राजनि०। अन्यस्य पक्वतायामेव शुक्लत्वमस्याः पुनर्जीवन्त्या एव तथात्वमिति तन्नामता। [राजनि०।

**जीवश्रेष्ठा** स्त्री जीवाय जीवनाय श्रेष्ठा। ऋद्धिनामौषधौ

**जीवसंज्ञ** पु०जीव इति संज्ञाऽस्य। कामवृद्धिवृक्षे राजनि०

**जीवसाधन** न०जीवस्य जीवनस्य साधनम्। धान्ये राजनि०

**जीवसू** स्त्री जीवं जीवन्तं सूते सू—क्विप्। जीवत्पुत्रिकायां स्त्रियां हेमच०। "जीवसूर्वीरसूर्भद्रे! बहुसौख्यसमन्विता" भा० आ० १९८ अ०।

**जीवस्थान** न० ६त०। मर्म्मणि हला०।

**जीवहीन** पु० "षड्वरो जीवहीनः" विश्वसारतन्त्रोक्ते षड्वरे मन्त्रे कुमारशब्दे २१०६ पृ० दृश्यम्।

**जीवा** स्त्री जीव—अच् जीवयतेरच् वा टाप् ज्या—क्विप् संप्रसारणे दीर्घः सा अस्त्यस्य व। १धनुषो गुणे ज्यायां २जीवन्तिकायामौषधौ, ३वचायां, ४शिञ्जिते, ५भूमौ ६जीवनोपाये च मेदि०। जीव—भावे अ टाप्। ७जीवने जटा०। धनुराकारक्षेत्रस्य वृत्तस्योभयरेखावृत्तसंलग्ने क्षेत्रभेदे तन्मानानयनादिकं लीला० दर्शितं तच्च क्षेत्रशब्दे २४०३ पृ० दर्शितम्। ग्रहस्पष्टगत्याद्युपयोगिनी राशिरूपक्षेत्रस्य जीवा तु क्रमज्याशब्दे २३०२पृ०उक्ता अधिकं ज्याशब्दे वक्ष्यते ज्योत्पत्तिप्रकारः सि० शि० उक्तो यथा

"इष्टाङ्गुलव्यासदलेन वृत्तं कार्य्यं दिगङ्कं भलवाङ्कितं च। ज्यासंख्ययाप्ता नवतेर्लवा ये तदाद्यजीवा धनुरेतदेव। द्वित्र्यादिनिघ्नं तदनन्तराणां चापे तु दत्त्वोभयतो दिगङ्कात्। यो यं तदग्रद्वयबद्धरज्जोरर्धं ज्यकार्धं निखिलानि चैवम्। अथान्यथा वा गणितेन वच्मि ज्यार्धानि तान्येव परिस्फुटानि। त्रिज्याकृतिर्दोर्गुणवर्गहीना मूलं तदीयं खलु कोटिजीवा। दोःकोटिजीवारहिते त्रिभज्ये तच्छेषके कोटिभुजोत्क्रमज्ये। ज्याचापमध्ये खलु योऽत्र बाणः सैवोत्क्रमज्या सुधियात्र वेद्या। त्रिज्यार्धं राशिज्या तत्कोटिज्या च षष्टिभागानाम्। त्रिज्यावर्गार्धपदं शरवेदांशज्यका भवति। त्रिज्याकृतीषुघातात् त्रिज्याकृतिवर्गपञ्चघातस्य। मूलोनादष्टहृतान्मूलं षट्त्रिंशदंशज्या। गजहयगजेषु५८७८निघ्नी त्रिभजीवा वा ऽयुतेन१००००संभक्ता। षट्त्रिंशदंशजीवा तत्कोटिज्याकृतेरिषुघ्नायाः। त्रिज्याकृतीषुघातान्मूलं त्रिज्योनितं चतुर्भक्तम्। अष्टादशभागानां जीवा स्पष्टा भवत्येवम्। क्रमोत्क्रमज्याकृतियोगमूलाद्दलं तदर्धांशकशिञ्जिनी स्यात्। त्रिज्योत्क्रमज्यानिहतेर्दलस्य मूलं तदर्धांशकशिञ्जिनी वा। तस्याः पुनस्तद्दलभागकानां कोटेश्च कोटग्रंशदलस्य चैवम्। अन्यज्ज्यकासाधनसुक्रमेवं पूर्वैः प्रवक्ष्येऽथ विशिष्टमस्मात्। त्रिज्याभुजज्याहतिहीनयुक्ते त्रिज्याकृती तद्दलयोः पदे स्तः। भुजोनयुक्तत्रिभखण्डयोर्ज्ये कोटिं भुजज्यां परिकल्प्य चैवम्। यद्दोर्ज्ययोरन्तरमिष्टयोर्यत्कोटिज्ययोस्तत्कृतियोगमूलम्। दलीकृतं स्याद्भुजयोर्वियोगखण्डस्य जीवैवमनेकधा वा। दोःकोटिजीवाविवरस्य वर्गो दलीकृतस्तस्य पदेन तुल्या। स्यात् कोटिबाह्वोर्विवरार्धजीवा वच्म्येऽथ मूलग्रहणं विनापि। दोर्ज्याकृतिर्व्यासदलार्धभक्ता लब्धत्रिमौर्व्योर्विवरेण तुल्या। दोःकोटिभागान्तरशिञ्जिनी स्याज्ज्यार्धानि वा कानिचिदेवमत्र। खगोऽङ्गेषुषडंशेन(६५६९) वर्जिता भुजशिञ्जिनी। कोटिज्या दशभिः क्षुण्णा त्रिसप्तेषु-(५७३)विभाजिता। तदैक्यमग्रजीवा स्यादन्तरं पूर्वशिञ्जिनी। प्रथमज्या भवेदेवं षष्टिरन्यास्ततस्ततः। व्यासार्धेऽष्टगुणाब्ध्यग्नितुल्ये स्युर्नवतिर्ज्यकाः। कोटिजीवा शताभ्यस्ता गोदस्रतिथि (१५२९)भाजिता। दोर्ज्या स्वाऽद्र्यङ्गवेदांश (४६७)हीना तद्योगसंमिता। तदग्रज्या तयोश्चापि विवरं पूर्वशिञ्जिनी। तत्त्वदस्रा २२५नगांशोना एवमत्राद्यशिञ्जिनी। ज्यापरम्परयैवं वा चतुर्विंशतिमौर्विकाः। चापयोरिष्टयोर्दोर्ज्ये मिथः-कोटिज्यकाहते। त्रिज्याभक्ते तयोरैक्यं स्याच्चापैक्यस्य दोर्ज्यका। चापान्तरस्य जीवा स्यात् तयोरन्तरसंमिता। अन्यज्यासाधने सम्यगियं ज्याभावनोदिता। समासभावना चैका तथान्यान्तरभावना। आद्यज्याचापभागानां प्रतिभागज्यकाविधिः। या ज्यानुपाततः सेष्टव्यासार्धे परिणाम्यते। आद्यदोःकोटिजीवाभ्यामेव कार्य्या ततो कुङः। भावना सुखदस्यज्या इष्टे व्यासदले स्फुटाः। स्थूलं ज्यानयनं धाद्यामिह नतोदितं मया। उक्ता संक्षेपतः पूर्वं ज्योत्पत्तिः सुगमा च सा। सविशेषाधुना तत्र विशेषाद्विष्टयोच्यतः"। तत्र तावदाचार्य्याणां पद्धतीमित्यादि श्लोकपञ्चकं